चन्द्रिका	— चान्दनी [प्रकाश रूप हो],	स्वादुता	— रस [रूप]
		असि	— हो,
त्वम्	— तुम	त्वम्	— तुम
तिग्मरुचौ	— सूर्य में	शिखिनि	— अग्नि में
रुचिः	— दीप्ति [विमर्श रूप हो],	उष्मा	— गर्मी [हो],
		यदि	— यदि
त्वम्	— तुम	त्वदृते	— [यह सब तत्त्व] तुम्हारी सत्ता विना
पुरुषे	— पुरुष में		
चेतना	— बुद्धि	स्यात्	— हों,
असि	— हो,	निखिलं	— [तो] यह सारा विश्व
त्वम्	— तुम		
पवने	— वायु में	निःसारमेव	— सत्ता रहित ही है।
बलं	— बल [हो],		

ہے ماتا بھگوتی جو کچھ آکاش میں چمکتے تارے

ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं چیزیں ہیں اور جو اس
सूते पयांसि यदहिर्धरणीं च धत्ते। میں پھرتے ہیں یعنی سورج
यद्वाति वायुरनलो यदुदर्चिरास्ते چندرما تارے جو اس آکاش
तत्सर्वमम्ब ! तव केवलमाज्ञयैव ॥२१॥ میں پھرتا ہے

جو آکاش بارش گراتا ہے مدھ آکاس جو جل پیدا کرتا ہے اور جو شیش ناگ اس پرتھوی کو دھارن کرتا ہے اور جو چلتا ہے اور جو آگنی اوپر کی طرف اٹھتی ہے سب ماتا

पदच्छेदः

ज्योतींषि यत् दिवि चरन्ति यत् अंतरिक्षं
सूते पयांसि यत् अहिः धरणीं च धत्ते ।
यत् वाति वायुः अनलः यत् उर्दाचः आस्ते
तत् सर्वम् अम्ब ! तव केवलम् आज्ञया एव ॥२१॥

यत्	— जो [यह]
ज्योतींषि	— तारागण
दिवि	— आकाश में
चरन्ति	— फिरते हैं,
यत्	— जो
अन्तरिक्षं	— आकाश
पयांसि	— जलों को
सूते	— उत्पन्न करता है,
यत्	— जो
अहिः	— शेषनाग
धरणीं	— पृथ्वी को
धत्ते	— धारण करता है,
यत्	— जो
वायुः	— वायु
वाति	— चलता है,
यत् च	— और जो
अनलो	— अग्नि
उर्दाचः	— ऊँची दीप्ति वाला
आस्ते	— है
अम्ब !	— हे माता !
तत्सर्वं	— वह सब
केवलं	— केवल
तव एव	— तुम्हारी ही
आज्ञया	— आज्ञा से [स्थिति प्राप्त किये हुए हैं।]

सङ्कोचमिच्छसि यदा गिरिजे ! तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरीभवन्ति ॥२२॥

पदच्छेदः

संङ्कोचं इच्छसि यदा गिरिजे ! तदानीं
वाक्तर्कयोः त्वम् असि भूमिः अनामरूपा ।

यत् वा विकासम् उपयासि यदा तदानीम्
त्वत् नामरूपगणनाः सुकरी भवन्ति ॥२२॥

गिरिजे !	— हे पार्वती !	असि	— हो,
यदा	— जब	यद्वा	— या
त्वं	— तुम	यदा	— जब
संकोचं	— स्वरूप का संकोच	विकासं	— स्वरूप के विकास को
इच्छसि	— [ग्रहण करना] चाहती हो	उपयासि	— प्राप्त करती हो
तदानीं	— तब	तदानीं	— उस अवस्था में
वाक-तर्कयोः	— वाणी और तर्क [विचार] में	त्वत्-	— तुम्हारे
अनामरूपा	— नामों और रूपों रहित	नामरूप-	— नामों और रूपों की
		गणनाः	— गिनती
		सुकरी	— आसान
भूमिः	— अवस्था	भवन्ति[1]	— हो जाती है।

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रूकिङ्करीकृतसरोजगृहासहस्राः।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥२३॥

पदच्छेदः

भोगाय देवि ! भवतीं कृतिनः प्रणम्य
भ्रूकिङ्करी कृतसरोजगृहा सहस्राः।
चिन्तामणि प्रचय कल्पित केलिशैले
कल्पद्रुम उपवने एव चिरं रमन्ते ॥२३॥

१. सभी स्थूल या सूक्ष्म वेधों के नाम और रूप तुम्हारे ही नाम रूप है।

देवि ! — हे देवी !

¹भ्रू- — भौंरों की
किंकरीकृत- — दास बनी हुई
सरोजगृहासहस्राः हज़ारों लक्ष्मियों वाले

कृतिनः — क्रियावान पुरुष
भोगाय — भोग (सांसारिक तथा पारमार्थिक) प्राप्त करने के लिये
भवतीं — आप को
प्रणम्य — प्रणाम करके

चिन्तामणि- — चिन्तामणि रत्नों के
प्रचय- — समूहों से
कल्पित- — बनाये हुए
केलि- — क्रीडा रूपी
शैले — पर्वत पर
कल्पद्रुम- — कल्प वृक्षों के
उपवने — बागों में
एव — ही
चिरं — अनन्त काल
रमन्ते — ऐश्वर्य भोगते हैं । (क्रीडा करते हैं)

हन्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम्।
वैकर्तनीकिरणसंहतिरेव शक्ता
धर्मं निजं शमयितुं निजयैव वृष्ट्या ॥२४॥

पदच्छेदः

हन्तुं त्वम् एव भवसि त्वत् अधीनं ईशे !
संसार तापम् अखिलं दयया पशूनाम् ।
वैकर्तनी किरण संहतिः एव शक्ता
धर्मं निजं शमयितुं निजया एव वृष्ट्या ॥२४॥

---

१. अर्थात् एक ही नहीं अनन्त लक्ष्मियां [भोग लक्ष्मी, मोक्ष लक्ष्मी, भक्ति लक्ष्मी इत्यादि] और ऐश्वर्य उनके वश में हो जाते हैं, यह सब लक्ष्मियां उस पुरुष के आंखों के इशारों पर नाचती हैं ।

ईशे !	— हे स्वतंत्र इच्छा वाली स्वामिनी !
पशूनां	— जन्म मरण में फंसे हुए जीवों के
अखिलं	— सारे
संसारतापं	— जन्म मरण से उत्पन्न हुए दुख को
त्वत्	— [जो] तुम्हारे ही
अधीनं	— अधीन है,
दयया	— अनुग्रह करके
हन्तुं	— नाश करने के लिए
त्वमेव	— तुम ही
भवसि	— समरथ हो । [जैसे]
वैकर्तनी-	— सूर्य की
किरण-	— किरणों का
संहतिरेव	— समूह ही
निजं	— आप उत्पन्न की हुई
घर्मं	— गर्मी को
निजया एव	— अपनी ही [शक्ति से उत्पन्न की हुई]
वृष्ट्या	— वर्षा से
शमयितुं	— शांत करने के लिए
शक्ता	— समरथ है ।

शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥२५॥

पदच्छेदः

शक्तिः शरीरं अधिदैवतं अन्तर् आत्मा
ज्ञान क्रिया करणं आसन जालं इच्छा ।
ऐश्वर्यं आयतनम् आवरणानि च त्वं
किं तत् न यत् भवसि ? देवि ! शशाङ्कमौलेः ॥२५॥

शशाङ्क-	— चन्द्रमा है
मौलेः	— माथे पर जिसके [ऐसे शिव की]
इच्छा	— इच्छा (स्वातंत्र्य) शक्ति
ऐश्वर्यम्	— सर्वकर्त्ताभाव सर्व-

देवि ! — क्रीडन शील शक्ति !
शक्तिः — प्राणशक्ति,
शरीरं — स्थूल शरीर,
अधिदैवतम् — शरीर के अधिष्ठित देव [अर्थात् दस इन्द्रियां],
अन्तरात्मा — अन्तः करण,
ज्ञानं — ज्ञान शक्ति,
क्रिया — क्रिया शक्ति,
करणम् — क्रियाओं का करना,
आसन- — आसन
जालम् — समूह

ज्ञताभाव,
आयतनम् — आश्रय
च — और
आवरणानि — स्वरूप के छिपाने वाले मल (यह सब कुछ)
त्वम् — तुम ही हो।
तत् किं — वह कौन सी वस्तु (भाव) है
यत् — जो
न भवसि — (तुम) नहीं बनती हो।

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीतशान्तिः।
व्योम्नीति याः किल कलाः कलयन्ति विश्वं
तासां विदूरतरमम्ब ! पदं त्वदीयम् ॥२६॥

पदच्छेदः

भूमौ निवृत्तिः उदिता पयसि प्रतिष्ठा
विद्या अनले मरुति शान्तिः अतीतशान्तिः
व्योम्नि इति याः किल कलाः कलयन्ति विश्वं
तासां विदूरतरम् अम्ब ! पदं त्वदीयम् ॥२६॥

भूमौ — पृथिवी तत्त्व में
निवृत्तिः — निवृत्ति कला,
पयसि — जल तत्त्व में
प्रतिष्ठा — प्रतिष्ठा कला

याः — जो
कलाः — कलायें
विश्वं — (३६ तत्त्वमय) जगत को

अनले	— अग्नि तत्त्व में	किल	— निश्चय ही
विद्या	— विद्या कला,	कलयन्ति	— प्रकट करती हैं[1]
मरुति	— वायु तत्त्व में	अम्ब !	— हे माता !
शांतिः	— शांति कला,	त्वदीयं	— तुम्हारा
व्योम्नि	— आकाश तत्त्व में	पदं	— स्थान
अतीत शांतिः	— शान्त्यतीत कला	तासां	— इन सब कलाओं से भी
उदिता	— उदय में आई हैं।		
इति	— इस प्रकार	विदूरतरम्	— बहुत ही ऊँचा है।

यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये।
तावद्विकल्प जटिलाः कुटिलप्रकारा-
स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥२७॥

पदच्छेदः

यावत् पदं पदसरोजयुगं त्वदीयं
न अङ्गीकरोति हृदयेषु जगत् शरण्ये !
तावत् विकल्प जटिलाः कुटिलप्रकाराः
तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥२७॥

जगत्शरण्ये !	— जगच्छरण्ये, हे जगत की रक्षा करने वाली देवी !	समयिनां	— भिन्न २ मतवादियों के
		विकल्प-	— विकल्पों के कारण
यावत्	— जब तक	जटिलाः	— पेचदार बने हुए
त्वदीयम्	— तुम्हारा	कुटिल-	— कुटिल

---

१. यह पांच कलायें ही जगत् की सृष्टि, स्थिति, संहार, पिधान तथा अनुग्रह करती हैं।

पदसरोज-	— चरण कमलों का	प्रकाराः	— प्रकार वाले
युगं	— जोडा	तर्क-	— वाद-विवाद रूपी
हृदयेषु	— हृदयों में	ग्रहाः	— हठ
पदं	— स्थान	प्रलयं	— समाप्त
न अंगीकरोति	— अंगीकार न करे[1]	न यांति	— नहीं होते हैं।
तावत्	— तब तक		

यद्देवयानपितृयानविहारमेके
कृत्वा मनःकरणमण्डलसार्वभौमम्।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम्॥२८॥

पदच्छेदः

यत् देवयान पितृयान विहारम् एके
कृत्वा मनः करण मण्डल सार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति ! नयन्ति निज आसनत्वम् ॥२८॥

पार्वति !	— हे पार्वती !	विहारम्	— फिरते हैं [अभ्यास करते हैं] (वह)
यत्	— जो		
एके	— कुछ उत्कृष्ट योगी	तव	— तुम्हारे
मनः	— मन को	याने	— [सुषुम्ना] मार्ग में
करण-	— इन्द्रियों के	निवेश्य	— प्रवेश करके
मण्डल-	— समूह का	कारण पंचकस्य	— पांच कारणों[2] के
सार्वभौमम्	— चक्रवर्ती राजा		

१. अर्थात् जब तक मोह में फंसा हुआ जीव तुम्हारी शरण न ले।
२. जगत की सृष्टि इत्यादि करने के पांच कारण ब्रह्मा, विष्णु, रुद्र, सदाशिव, ईश्वर।

कृत्वा	— बनाकर	पर्वाणि	— सिरों को
देवयान-	— देवताओं के मार्ग [प्राण]	निज-	— अपना
पितृयान-	— [और] पितृमार्ग [अपान] में	आसनत्वम्	— आसन
		नयन्ति	— बनाते हैं ।[1]

स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सासि स्तुता किल मयेति तितिक्षितव्यम् ॥२९॥

पदच्छेदः

स्थूलासु मूर्तिषु मही प्रमुखासु मूर्तेः
कस्याःचन अपि तव वैभवम् अम्ब ! यस्याः ।
पत्या गिराम् अपि न शक्यते एव वक्तुं
सा असि स्तुता किल मया इति तितिक्षितव्यम् ॥२९॥

मही-	— पृथिवी	वक्तुं	— वर्णन करने के लिए
प्रमुखासु	— इत्यादि	न शक्यते	— असमर्थ है
स्थूलासु	— स्थूल	सा	— वही (आप ऐसे उत्कृष्ट महिमा वाली)
मूर्तिषु	— रूपों में से		
कस्याश्चन	— किसी एक		
मूर्तेः	— रूप का	अम्ब !	— हे माता !
अपि	— भी	मया	— मुझ (जैसे तुच्छ) से
यस्याः	— जिस	किल	— निश्चय ही

१. अर्थात् इन से भी ऊँची पदवी प्राप्त करते हैं ।

तव	— तुम्हारे (अकथनीय स्वरूप का)	स्तुता असि	— स्तुति की जा रही हो
वैभवम्	— प्रभाव (महिमा) को	इति	— (मेरी) यह धृष्टता
गिरां	— वाणियों का	तितिक्षितव्यम्	— कृपया आप सहलें (अर्थात् मुझे क्षमा करें।)
पत्या	— स्वामी (ब्रह्मा जी)		
अपि	— भी		

कालाग्निकोटिरुचिमम्ब षडऽध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम्।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥३०॥

पदच्छेदः

काल अग्निकोटिरुचिम् अम्ब ! षट् अध्वशुद्धौ
आप्लावनेषु भवतीम् अमृतओघ वृष्टिम्।
श्यामां घनस्तनतटां सकली कृतौ च
ध्यायन्तः एव जगतां गुरवः भवन्ति ॥३०॥

अम्ब !	— हे माता !	सकली-कृतौ	— इनको सम्पूर्ण बनाने [स्थिति करने] में
षडध्व-	— छः मार्गों को[1]	श्यामां	— श्याम वर्ण
शुद्धौ	— शुद्ध करने में[2]	घनस्तनतटां	— भारी स्तनोंसे [माता के रूप में दूध देती
भवतीं	— आपको		
कालग्नि-कोटि-	— करोडों कालाग्नि रुद्रों जैसी		

१. वर्ण, पद, मन्त्र, कला, तत्त्व, भुवन।
२. अभेद रूप बनाने में।

रुचिम् — दीप्ति (तेज) वाली,
आप्लावनेषु — इन भुवनों को सींचन (सृष्टि) करने में
अमृतौघ- — अमृत से भरी हुई
वृष्टिं — वर्षारूप,
च — और

हुई आपको भक्त]
ध्यायन्त एव — एकाग्रचित से ध्यान करते हुए ही [क्षण-मात्र में]
जगतां — सभी जगतों के
गुरवो — गुरु[1]
भवन्ति — बन जाते हैं ।

विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनाम
साक्षादपारकरुणां गुरुमूर्तिमेव ।।३१।।

पदच्छेदः

विद्यां परां कतिचित् अम्बरम् अम्ब ! केचित्
आनन्दम् एव कतिचित् कतिचित् च मायाम् ।
त्वां विश्वम् आहुः अपरे वयम् आमनाम
साक्षात् अपार करुणां गुरुमूर्तिम् एव ।।३१।।

अम्ब ! — हे माता !
त्वां — तुझको
कतिचित् — कुछ भक्त
परां विद्यां — परा [उत्कृष्ट] ज्ञान रूप,
केचित् — कुछ

वाली) माया रूप,
अपरे — इन से भिन्न कुछ लोग
त्वां — तुझको
विश्वं — जगत रूप ही
आहुः — कहते हैं

१. उत्तम माननीय सृष्टि आदि करने में समर्थ ।

अम्बरम् — आकाश रूप [चिदाकाश],
कतिचित् — कुछ
आनन्दमेव — (केवल) आनन्दरूप ही
च — और
कतिचित् — कुछ
मायाम् — (भेद उत्पन्न करने

वयम् — (परन्तु) हम (इन से भिन्न भक्त) (आपको)
साक्षाद् — प्रत्यक्ष
अपार — पाररहित
करुणां — अनुग्रहरूप
गुरुमर्त्तिमेव — सद्‌गुरु का स्वरूप ही
आमनाम — कहते हैं।

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः
सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥३२॥

पदच्छेदः

कुवलयदलनीलं बर्बर स्निग्धकेशं
पृथुतरकुचभार आक्रान्त कान्त अवलग्नम् ।
किम् इह बहुभिः उक्तैः त्वत् स्वरूपं परं नः
सकल भुवन मातः ! सन्ततं सन्निधत्ताम् ॥३२॥

सकल- — हे सभी
भुवन- — भुवनों की
मातः ! — माता !
इह — यहां
बहुभिः — अधिक
उक्तैः — कहने से
किं — क्या [लाभ है ?]

स्निग्धकेशं — चिकने चमकीले बालों वाला,
पृथुतर- — मोटे
कुचभार- — स्तनों के भार से
आक्रान्त- — घेरे हुए
कान्त- — सुन्दर
अवलग्नम् — कमर वाला

	केवल इतनी प्रार्थना है कि
कुवलयदल-	— नीली कुईं के पुष्पों जैसा
नीलं	— श्याम वर्ण,
बर्बर-[1]	— बर्बर (जैसे)
त्वत्- परं स्वरूपं	— तुम्हारा उत्कृष्ट स्वरूप
नः	— हमें
सन्ततं	— नित्य
सन्निधत्ताम्	— प्रकट रहे।

इति श्री पञ्चस्तव्यां चतुर्थोऽम्बस्तवः ॥

१. एक चिकनी चमकेली लता जिसे कश्मीरी में बबर कहते हैं।

ॐ

अथ सकलजननीस्तवः पञ्चमः

ॐ अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः।
जगन्मातर्जन्मज्वरभयतमःकौमुदि ! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १॥

पदच्छेदः

अजानन्तः यान्ति क्षयम् अवशम् अन्योन्य कलहैः
अमी माया ग्रन्थौ तव परिलुठन्तः समयिनः।
जगत् मातः ! जन्मज्वरभयतमःकौमुदि ! वयं
नमः ते कुर्वाणाः शरणम् उपयामः भगवतीम् ॥१॥

जगन्मातः !	— हे जगतों को उत्पन्न करने वाली मां !
जन्मज्वर-भयतमः-कौमुदि !	— जन्ममरण ज्वर के भय रूपी अंधकार के लिये चांदनी रूप! (अंधकार को नाश करने वाली)
अमी समयिनः	— यह सभी भिन्न २ मतवादी
परिलुठन्तः	— गिरते फंसते हुए
अवशम्	— बेबस (परतंत्र) होकर
क्षयंयान्ति	— नाशको प्राप्त होते हैं (जन्ममरण रूपी चक्र में फंसते हैं)
वयं	— हम (शरणागत भक्त)
ते भगवतीम्	— तुझ ऐश्वर्यशालि-

अजानन्तः	— तुम्हारे सच्चे स्वरूप को न जानते हुए		नी भगवती को
अन्योन्य-	— एक दूसरे के साथ	नमः	— नमस्कार
कलहैः	— तर्क वितर्क रूप झगड़ा करने के कारण	कुर्वाणाः	— करते हुए (देहाभिमान को तुझ में अर्पण करते हुए)
तव	— तुम्हारी	शरणं	— शरण में
मायाग्रन्थौ	— माया रूपी गांठ में (फंदे में)	उपयामः	— आते हैं।

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतितुलितनीलोत्पलरुचे।
शिवस्याराध्याय स्तनभरविनम्राय सततं
नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥२॥

पदच्छेदः

वचः तर्क अगम्य स्वरस परम-आनन्द विभव-
प्रबोध आकाराय द्युति तुलित नील उत्पल रुचे !
शिवस्य आराध्याय स्तन भर विनम्राय सततं
नमः यस्मै कस्मैचन भवतु मुग्धाय महसे ॥२॥

द्युति-	— तेज में	आराध्याय	— आराधना करने योग्य [तुझ देवी को]
तुलित-	— समान बने हुए	स्तनभरविनम्राय	भारी वक्षः स्थल [स्तनों] के कारण झुकी हुई देवी को [जगत की सृष्टि करने के लिए उद्योग में आई हुई]
नीलोत्पल-	— कमल जैसी		
रुचे !	— दीप्ति वाली [हे देवी !]		
वचः-	— वाणी [और]		
तर्क-	— विचार से		
अगम्य-	— न जानने योग्य		

स्वरस- — अपने ही [चित्] रस से

परमानंदविभव – परमानंद रूप ऐश्वर्य को

प्रबोधाकाराय — जगाने वाले स्वरूप वाली [तुझ देवी को]

शिवस्य -- शिव से भी

यस्मैकस्मैचन — किसी अलौकिक [मन और वाणी के अगोचर]

मुग्धाय — सुन्दर [आनन्द रूप]

महसे — तेज को [चित् रूप को]

नमो भवतु — नमस्कार हो।

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका-
मुदञ्चद्धर्माम्भः कणगुणितनीलोत्पलरुचम्।
शिवं पार्थत्राणप्रवणमृगयाकारगुणितं
शिवामन्वक्यान्तीं शवरमहमन्वेमि शवरीम् ॥३॥

पदच्छेदः

लुठत् गुञ्जाहार स्तनभर नमन् मध्यलतिकाम्
उदञ्चत् धर्माम्भः कण गुणित नीलोत्पलरुचम् ।
शिवं पार्थत्राण प्रवण मृगया आकार गुणितं
शिवां अन्वक्यान्तीं शवरं अहं अन्वेमि शवरीम् ॥३॥

उदञ्चत्- — निकलते हुए

धर्माम्भः- — पसीने के

कण- — परमाणुओं [कतरों] से

गुणित- — समान बने हुए

नीलोत्पलरुचम् कमल की शोभा-युक्त [मुख वाले शिव के]

पार्थत्राण- — अर्जुन की रक्षा करने में

लुठत्- — लटकते हुए [स्पन्द-मान्]

गुञ्जाहार- — गुंजा फलों [रत्ति-यों] के

स्तन भर- — भारी वक्षःस्थलों के बीच में

नमन्- — लटकते हुए

मध्यलतिकां — हार के बीच वाले आभूषण युक्त

(4)

प्रवण- — निपुण

मृगयाकार- — शिकारी के वेश से

गुणितं — शोभित [शिव के]

शवरं शिवं — शिकारी रूप शिव के

अन्वक् यान्तीं — पीछे पीछे चलती हुई

शवरीं — शिकारिन रूप धारण किये हुए

शिवां — शिव की शक्ति [पार्वती] को

अहं — मैं

अन्वेमि — बार बार प्रणाम करता हूं।

मिथः केशाकेशिप्रधननिधनास्तर्कघटना,
बहुश्रद्धाभक्तिप्रणयविषयाश्चाप्तविधयः।
प्रसीद प्रत्यक्षीभव, गिरिसुते ! देहि, शरणं
निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥४॥

पारिप्लवमिदम्

पदच्छेदः

मिथः केशाकेशिप्रधननिधनाः तर्कघटनाः
बहुश्रद्धाभक्तिप्रणयविषयाः च आप्तविधयः।
प्रसीद प्रत्यक्षीभव गिरिसुते ! देहि शरणं
निरालम्बं चेतः परिलुठति पारिप्लवम् इदम् ॥४॥

तर्कघटना — वादविवाद करने वाले (भिन्न भिन्न मतवादी)

मिथः- — एक दूसरे के

केशाकेशि- — बालों को उखाडने के समान

प्रधन- — झगडों [कलह] के कारण

निधनाः, — नाश को प्राप्त होते से पूर्ण [होती हैं],

गिरिसुते ! — [इस लिए] हे पार्वती !

प्रसीद — हम पर प्रसन्न हो जाओ,

प्रत्यक्षी भव — [और] प्रकट रूप से अपना स्वरूप दिखाओ,

देहि शरणं — हमें अपनी शरण में

हैं,

आप्त-	— और परमार्थ को जानने वालों की
विषय: च	— विधियां [व्यवहार]
बहु श्रद्धाभक्ति-	अत्यन्त विश्वास, प्रेम और
प्रणयविषया:	— नम्रता रूप विषय

ले लो,

निरालम्बं	— आश्रय हीन
चेत:	— हमारा मन
इदं	— इस [संसार रूप]
परिप्लवं	— उपद्रव में
परिलुठति	— डूब रहा है ।

शुनां वा वह्ने र्वा खगपरिषदो वा यदशनं
कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।
अमुष्मिन्विश्वासं विजहिहि ममाह्नाय वपुषि
प्रपद्येथाश्चेत: सकलजननीमेव शरणम् ।।५।।

पदच्छेद:

शुनां वा वह्ने: वा खगपरिषद: वा यत् अशनं
कदा केन क्व इति क्वचित् अपि न कश्चित् कलयति ।
अमुष्मिन् विश्वासं विजहि हि मम अह्नाय वपुषि
प्रपद्येथा: चेत: सकलजननीम् एव शरणम् ।।५।।

चेत: !	— हे मन !
यत्	— जो यह (शरीर)
शुनां वा	— या तो कुत्तों का
वह्ने: वा	— या तो अग्नि का (जलाये जाने से)
खगपरिषदो वा	या तो पक्षियों के समूह का
अशनं	— भोजन बनता है
कदा	— किस समय पर,

न कलयति	— (विचार नहीं करता है) नहीं जानता है
अमुष्मिन्	— इस (ऐसे शरीर)
मम	— मेरे
वपुषि	— शरीर पर
विश्वासं	— विश्वास (अभिमान)
अह्नाय	— तुरंत ही
विजहिहि	— छोड दे

केन	— किस कारण से,	सकलजननीम् एव	सबों की माता (देवी) की ही
क्व	— किस स्थान पर,	शरणं	— जो बचाने वाली है
इति	— इस बात को	प्रपद्येथा:	— शरण लो ।
कश्चित्	— कोई भी पुरुष		
क्वचिदपि	— कहीं भी		

अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी
शिवस्यासीर्यत्त्वं परिणयविधौ देवि ! गृहिणी ।
सवित्री भूतानामपि यदुदभूः शैलतनया,
तदेतत्संसारप्रणयनमहानाटकसुखम् ॥६॥

पदच्छेद:

अनाद्यन्ता भेदप्रणयरसिका अपि प्रणयिनी
शिवस्य आसी: यत् त्वं परिणयविधौ देवि ! गृहिणी
सवित्री भूतानाम् अपि यत् उदभू: शैलतनया
तत् एतत् संसार प्रणयनमहानाटक सुखम् ॥६॥

देवि !	— हे देवी !	आसी:	— बन गई
अनाद्यन्ता-	— आदि और अंत रहित,	यत्	— (और) जो
		भूतानां	— जीवों की
भेदप्रणय-	— भेद के प्रेम का	सवित्री	— उत्पन्न करने वाली
रसिकापि	— स्वाद करने वाली होकर भी	अपि	— (होते हुए) भी
		शैलराज-	— हिमालय की
प्रणयिनी	— प्रेम से भरी	तनया	— पुत्री (बन कर)
यत्	— जो	उदभू:	— उत्पन्न हुई
त्वम्	— तू	तदेतत्	— वही यह सब
परिणयविधौ	— विवाह की विधि में	संसार-	— संसार के

(7)

शिवस्य — शिव की
गृहिणी — पत्नी
महा नाटक- — बडे नाटक का
सुखम् — सुख है

ब्रु वन्त्येके तत्त्वं भगवति ! सदन्ये विदुरस-
त्परे मातः ! प्राहुस्तव सदसदन्ये सुकवयः ।
परे नैतत्सर्वं समभिदधते देवि ! सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ! ।।७।।

पदच्छेदः

ब्रुवन्ति एके तत्त्वं भगवति सत् अन्ये विदुःअसत्
परे मातः प्राहुः तव सत् असत् अन्ये सुकवयः ।
परे न एतत् सर्वं समभिदधते देवि सुधियः
तत् एतत् त्वत् माया विलसितं अशेषं ननु शिवे ।।७।।

भगवति ! — हे ऐश्वर्य शालिनी देवी !
एके — कुछ लोग
तव — तुम्हारे
तत्त्वं — स्वरूप को
सत् — सत् रूप [भाव]
ब्रुवन्ति — कहते हैं,
अन्ये — इन से भिन्न कुछ और लोग
असत् — असत् रूप [अभाव]
विदुः — जानते हैं,
अन्ये परे — इन से भी परे [कुछ]
सुकवयः — सर्वज्ञ जन
सदसत् — [तुम्हारे स्वरूप को]
प्राहुः — कहते हैं,
परे — इन से भी परे [कुछ योगी]
सुधियः — बुद्धिमान
नैतत्सर्वं — इन सत् और असत् दोनों में से कुछ भी नहीं
समभिदधते — कहते हैं,
देवि ! शिवे ! — हे देवी, हे शिव की शक्ति !
तत् — तो
एतत् अशेषं — यह सब कुछ
ननु — निश्चय ही
त्वत्- — तुम्हारी

	सत् तथा असत् दोनों ही [भावा-भाव]	माया-	— मायाशक्ति का
		विलसितम्	— विकास है।

तडित्कोटिज्योतिद्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा।
किमप्यष्टात्रिंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥८॥

पदच्छेदः

तडित् कोटिज्योतिः द्युतिदलितषट्ग्रन्थि गहनं
प्रविष्टं स्वाधारं पुनः अपि सुधावृष्टि वपुषा।
किम् अपि अष्टात्रिंशत् किरण सकली भूतम् अनिशं
भजे धाम श्यामं कुचभरनतं बर्बर कचम् ॥८॥

तडित्कोटि-	— करोडों बिजलियों के
ज्योति-	— प्रकाश की
द्युति-	— दीप्तियों से
दलित-	— काटी हुई
षड्ग्रंथिगहनं	— छः ग्रंथि रूप जंगल [काम, क्रोध, लोभ, मोह, मद, अहङ्कार] वाले,
पुनः अपि	— फिर भी
सुधावृष्टि-	— चित् अमृत वर्षा रूप
वपुषा	— स्वरूप से
किमपि	— किसी अलौकिक,
अष्टात्रिंशत्-[1]	— अठतीस
किरण-	— किरणों से
सकलीभूतं	— परिपूर्ण बने हुए
श्यामं	— श्याम वर्ण
धाम	— स्वरूप [देवी] को
बर्बर कचम्	— [कश्मीरी] बर्बर जैसे चमकीले स्वरूप को
अनिशं	— बारबार [निरन्तर]
भजे	— [मैं] नमस्कार कर-

१. ३८ किरण, सूर्य १२ कला, चन्द्रमा १६ कला, अग्नि १० कला।

स्वाधारं — अपने आधार में
प्रविष्टं — प्रवेश किये हुए

...ता हूं।

चतुष्पत्रान्तः षड्दलभगपुटान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतियुते।
षडश्रं भित्त्वादौ दशदलमथ द्वादशदलं
कलाश्रं च द्व्यश्रं गतवति ! नमस्ते गिरिसुते! ॥६॥

पदच्छेदः

चतुष्पत्रअन्तः षड्दलभगपुटअन्तः त्रिवलय-
स्फुरत् विद्युत् वह्निद्युमणि नियुताभद्युतियुते
षट् अश्रं भित्त्वा आदौ दशदलं अथ द्वादशदलं
कला अश्रं च द्विअश्रं गतवति ! नमस्ते गिरिसुते ! ॥९॥

चतुष्पत्रान्तः	— चार पत्ते वाले कमल [मूलाधार] के बीच में
षड्दल-	— छः पत्ते रूप
भगपुटान्तः	— दो तिकोणों के भीतर [इच्छा-ज्ञान-क्रिया और इनके वेद्य]
त्रिवलय-	— तीन बार लपेटी हुई
स्फुरत्-	— विकसित होती हुई
विद्युत्-	— बिजली
वह्नि-	— अग्नि [तथा]
द्युमणि-	— सूर्य के समान
नियुताभ-	— अनन्त
द्युतियुते !	— तेजवाली !
अथ	— इसके बाद
दशदलं	— दस पत्ते वाले कमल में [मणिपूर-नाभि]
द्वादशदलं	— फिर बारह पत्ते वाले कमल को [अनाहत-हृदय]
कलाश्रं	— फिर १६ पत्ते वाले कमल को [विशुद्ध-कण्ठ]
द्व्यश्रं	— फिर २ पत्ते वाले कमल में [आज्ञा-भ्रूमध्य]
गतवति	— प्रवेश करती हुई [सहस्रार और ब्रह्म-

			रन्ध्र में]
आदौ	— पहले	गिरिसुते !	— हे हिमालय की पुत्री पार्वती !
षडश्रं	— षड्दल कमल को [स्वाधिष्टान]		
भित्त्वा	— फाड कर	नमस्ते	— तुझे नमस्कार हो।

(10)

कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः
परे तत्सम्भेदं समभिदधते कौलमपरे।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये ! तत्त्वं तव कथममी निश्चिनुमहे ॥१०॥

पदच्छेदः

कुलं केचित् प्राहुः वपुः अकुलं अन्ये तव बुधाः
परे तत्सम्भेदं समभिदधते कौलं अपरे।
चतुर्णां अपि एषाम् उपरि किं अपि प्राहुः अपरे
महामाये ! तत्त्वं तव कथं अमी निश्चिनुमहे ॥१०॥

महामाये !	— हे महामाया !	समभिदधते	— कहते हैं,
केचित्	— कुछ लोग	अपरे	— कुछ और लोग
तव	— तुम्हारे	कौलम्	— कौलरूप [कहते हैं],
वपुः	— स्वरूप को	अपरे अमी	— इन से भी उत्कृष्ट ज्ञानी
कुलं	— कुल रूप [३६ तत्त्व रूप, विश्वमय]	एषां	— इन
प्राहुः	— कहते हैं।	चतुर्णां अपि	— चारों से भी
अन्ये	— इन से भिन्न कुछ और	उपरि	— ऊंचा [उत्कृष्ट]
		किमपि	— कोई अलौकिक [अकथनीयरूप]
बुधाः	— ज्ञानी लोग		
अकुलं	— कुलातीत [विश्वोत्तीर्ण] [मानते हैं],	प्राहुः	— मानते हैं,
		तव तत्त्वं	— तुम्हारे स्वरूप को

परे	— इन से भी भिन्न कुछ
तत्संभेदं	— [इन दोनों] कुल तथा अकुल के मेल रूप, [विश्वमय तथा विश्वोत्तीर्ण]
कथं	— कैसे
निश्चिनुमहे	— हम निश्चय रूप से जानें ! [नहीं जान सकते।]

षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम्।
वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः
कुचाभ्यामानम्रः शिवपुरुषकारो विजयते ।।११।।

पदच्छेदः

षट्अध्वअरण्यानीं प्रलयरवि कोटि प्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्व शिरसाम् ।
वितन्वानः शैवं किंअपि वपुः इन्दीवररुचिः
कुचाभ्याम् आनम्रः शिव पुरुष कारो विजयते ।।११।।

प्रलयरविकोटि-	प्रलयकाल के करोड़ों सूर्यों के समान
प्रतिरुचा	— दीप्ति वाले
रुचा	— तेज से
षट्अध्व-	— छः अध्व [मार्ग] रूप
अरण्यानीं	— वन को
भस्मीकृत्य	— जलाकर
स्वपदकमल-	— अपने चरण कमलों पर
प्रह्वशिरसाम्	— झुके हुए मस्तक वाले [भक्तों] को
	कासमय]
शैवं वपुः	— शिव के स्वरूप को
वितन्वानः	— विस्तार से प्रकट करता हुआ
कुचाभ्याम्	— ज्ञान क्रियारूप स्तनों के बोझ से [दूध पिला कर पालने वाली माता के]
आनम्रः	— झुका हुआ
शिव-	— शिव का

(12)

किमपि	— किसी अलौकिक [अकथनीय]	पुरुषकारः	— उद्योग [शक्ति]
इन्दीवररुचिः	— कमल की शोभा वाले [सङ्कोच वि-	विजयते	— जयशील है [सभी से उत्कृष्ट बढ चढ कर है ।]

प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुः शिवमकुलमम्ब ! प्रविशति ।१२।

पदच्छेदः

प्रकाश आनन्दाभ्यां अविदितचरीं मध्य पदवीं
प्रविश्य एतत् द्वन्द्व रविशशिसमाख्यं कवलयन् ।
प्रविश्य ऊर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात् ते जन्तुः शिवं अकुलं अम्ब ! प्रविशति ॥१२॥

अम्ब !	— हे माता !		रूप
अविदितचरीं	— पहले अच्छी तरह न जानी हुई	दहन-	— अग्नि से
		भस्मीकृत-	— जलाये हुए [आत्म-सात् किए हुए]
मध्यपदवीं	— संवित् में		
प्रकाशानन्दाभ्यां	चित् और आनन्द द्वारा	कुलः	— सभी तत्त्वों वाला [योगी]
प्रविश्य	— प्रवेश करके,	जन्तुः	— जीव
रविशशिसमाख्यं	सूर्य और चन्द्रमा नाम वाले [प्राण, अपान]	ते	— तुम्हारे
		प्रसादात्	— अनुग्रह से
		अकुलं	— तत्त्वों से अतीत
एतत् द्वन्द्वं	— इस जोडे को	शिवं	— शिव में
कवलयन्	— ग्रास करता हुआ,	प्रविशति	— प्रवेश करता है ।

ऊर्ध्वं नादं	— ऊपर वाले नाद में		[शिव रूप ही बन
प्रविश्य	— प्रवेश करके		जाता है।
लय-	— लय [आत्मसात्कार]		

प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां
समुन्मीलन्मुक्ताफलबहुलनेपथ्यकुसुमाम्।
स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥१३॥

पदच्छेदः

प्रियङ्गु श्यामअङ्गीं अरुणतरवासः किसलयां
समुन्मीलत् मुक्ताफलबहुलनेपथ्य कुसुमाम्।
स्तनद्वन्द्वस्फारस्तवकनमितां कल्पलतिकां
सकृत् ध्यायन्तः त्वां दधति शिवचिन्तामणिपदम् ॥१३॥

प्रियङ्गु-	— प्रियंगु[1] जैसे	स्तवक-	— गुच्छे से
श्यामाङ्गीम्	— श्याम वर्ण अङ्गों सहित,	नमितां	— झुकी हुई
अरुणतर-	— लालरङ्ग के	कल्पलतिकां	— [भोग तथा मोक्ष सिद्ध कराने वाली] कल्प लता रूप
वासः	— वस्त्र रूपी		
किसलयां	— कोंपलों वाले,	त्वां	— तुम्हारे स्वरूप को
समुन्मीलन्-	— पूरी तरह खिले हुए	सकृत्	— एक ही बार [निरन्तर]
मुक्ताफल-	— मोती रूप फल की		
बहुल-	— बहुतात से	ध्यायन्तः	— ध्यान करने वाले [भक्त]
नेपथ्य-	— सजावट वाले		

१. एक लता का नाम जिसके सम्बन्ध में कहा जाता है कि जहां उसे किसी स्त्री ने स्पर्श किया कि, वह फूलने लगती है।

कुसुमां	— फूलों युक्त [और]	शिवचिन्तामणिपदं	शिवरूप चिंतामणि-रत्न के स्थान को
स्तनद्वन्द्व-	— ज्ञान क्रिया रूप दो स्तनों के	दधति	— धारण करते हैं। [प्राप्त करते हैं।]
स्फार-	— फैलाव रूप		

षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
श्चलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः।
क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदीं
भवानि! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी॥१४॥

पदच्छेदः

षट्आधार आवर्तैः अपरिमितमन्त्रऊर्मिपटलैः
चलन् मुद्राफेनैः बहुविधलसत् दैवतझषैः।
क्रमस्रोतोभिः त्वं वहसि परनाद अमृत नदीं
भवानि! प्रत्यग्रा शिवचित् अमृत अब्धि प्रणयिनी॥१४॥

भवानि!	— हे देवि!		वाले,
त्वं	— तुम	चलन्-	— चञ्चल
प्रत्यग्रा	— नित्य नवीन (अविनाशी स्वरूप)	मुद्राफेनैः	— मुद्रारूप झागों वाले
शिव-	— शिवरूप	बहुविधलसत्-	— अनेक प्रकार से विकसित
चित् अमृत-	— चैतन्य अमृत के	दैवतझषैः	— देवता (इन्द्रियरूप) रूप मगरमच्छों भरे
अब्धि-	— सागर में		
प्रणयिनी	— पहुँचाने वाली (जीव को शिव के साथ एकता कराने वाली)	क्रमस्रोतोभिः	— क्रम से चलने वाले प्रवाहों वाली (नदी को)
षट्आधार-	— छः आधार रूप	परनादामृत-	— परमनाद (अकृत्रिम अहंता)

	— (काम, क्रोध, लोभ मोह, मद, अहंकार)	नदीं	— रूप अमृत की नदी को
आवर्तैः	— भंवरों वाले,	वहसि	— चलाती हो (शिव सागर में पहुँचाती हो।)
अपरिमित-	— अनन्त		
मंत्र-	— मन्त्ररूप		
ऊर्मिपटलैः	— लहरियों के समूहों		

महीपाथोवह्निश्वसनवियदात्मेन्दु रविभि-
र्वपुर्भिग्र्स्तांशैरपि तव कियानम्ब ! महिमा।
अमून्यालोक्यन्ते भगवति ! न कुत्राप्यणुतरा-
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥१५॥

पदच्छेदः

मही पाथः वह्नि श्वसन वियत् आत्मा इन्दुरविभिः
वपुर्भिः ग्रस्तअंशैः अपि तव कियान् अम्ब ! महिमा।
अमूनि आलोक्यन्ते भगवति ! न कुत्र अपि अणुतराम्
अवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥१५॥

अम्ब !	— हे माता !	महिमा	— महिमा
मही[1]	— पृथ्वी,	कियान्	— कितनी बडी है (जो वर्णन नहीं की जा सकती)
पाथो[2]	— जल,		
वह्नि[3]	— अग्नि,		
श्वसन,[4]	— वायु,		
वियत्[5]	— आकाश	अमूनि	— यह सब (आठों)
आत्मा,[6]	— जीवात्मा (प्रमाता)	त्वयि तु	— तुझ
इन्दु,[7]	— चन्द्रमा (प्रमेय)	परमव्योमवपुषि	परमचिदाकाश स्वरूप में
रविभिः[8]	— सूर्य रूप (प्रामण)		
वपुर्भिः	— स्वरूपों से	अणुतरांअवस्थां	अत्यन्त सूक्ष्म अवस्था को
ग्रस्तांशैः	— ग्रास हुए अङ्गों स-		

	हित से	प्राप्तानि	— पहुँच कर
अपि	— भी	न कुत्रापि	— कहीं भी नहीं
तव	— तुम्हारी	आलोक्यन्ते	— दिखाई देते हैं।

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौमग्नं त्रिगुणलहरीकोटिलुठितम्।
कटाक्षश्चेदत्र क्वचन तव मातः! करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम्॥१६॥

पदच्छेदः

मनुष्याः तिर्यञ्चः मरुतः इति लोकत्रयम् इदं
भव अम्भोधौमग्नं त्रिगुणलहरी कोटि लुठितम्।
कटाक्षः चेत् अत्र क्वचन तव मातः! करुणया
शरीरी सद्यः अयं व्रजति परमानन्दतनुताम्॥१६॥

मनुष्याः	— मनुष्य,	मातः!	— हे माता,
तिर्यञ्चः	— पशु पक्षी आदि,	अत्र	— इन में से
मरुतः	— देवता समूह,	क्वचन	— किसी एक पर
इति	— इस प्रकार	तव करुणया	— तुम्हारी दया से
इदम्	— यह	कटाक्षः	— अनुग्रह की दृष्टि
लोकत्रयम्	— तीन लोकों का समूह	चेत्	— यदि हो, [तो]
त्रिगुण-	— तीन गुण [सत्व, रज, तम] रूप	शरीरी अयं	— वह जीव
		सद्यः	— तत्क्षणात्
लहरीकोटि-	— करोडों लहरों से	परमानन्द-	— परमानन्द-
लुठितम्	— व्याकुल किया हुआ	तनुताम्	— स्वरूप भाव को
भवाम्भोधौ	— संसार सागर में	व्रजति	— प्राप्त होता है।
मग्नम्	— डूबा हुआ है,		

कलां प्रज्ञामाद्यां समयमनुभूतिं समरसां
गुरुं पारम्पर्यं विनयमुपदेशं शिवकथाम् ।
प्रमाणं निर्वाणं परममतिभूतिं परगुहां
विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥१७॥

पदच्छेदः

कलां प्रज्ञां आद्यां समयं अनुभूतिं समरसां
गुरुं पारम्पर्यं विनयं उपदेशं शिवकथाम् ।
प्रमाणं निर्वाणं परमं अतिभूतिं परगुहाम्
विधिं विद्यां आहुः सकलजननीं एव मुनयः ॥१७॥

मुनयः	— मननशील पुरुष	विनयं	— आदर रूप,
सकलजननीं	— जगत की माता	उपदेशं	— उपदेश रूप,
एव	— [देवी] को ही	प्रमाणं,	— प्रमाण रूप,
कलां	— क्रिया शक्ति रूप,	निर्वाणं	— मुक्ति रूप,
प्रज्ञां	— बुद्धि रूप,	परमं	— उत्कृष्ट
आद्यां	— सब का आद्य,	अतिभूतिं	— ऐश्वर्य रूप,
समयम्	— परमसिद्धान्त रूप,	परगुहां	— अति रहस्य माया रूप,
अनुभूतिं	— अहं विमर्श के अनुभव रूप,	विधिं	— विधि रूप,
समरसां	— समरस	विद्यां	— बिद्या रूप
शिवकथां	— शिव के विमर्शरूप,	आहुः	— इन इन अनन्त नामों से पुकारते हैं।
गुरुं	— गुरु रूप,		
पारम्पर्यं	— गुरु परम्परा रूप,		

प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे
ततस्तत्त्वे चाष्टध्वनिभिरनुपाधिन्युपरते ।

श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्र गहनां
स्वसंवित्तिं योगी रसयति शिवाख्यां परतनुम्।१८।

पदच्छेदः

प्रलीने शब्द ओघे तत् अनु विरते बिन्दुविभवे
ततः तत्त्वे च अष्टध्वनिभिः अनुपाधिनि उपरते।
श्रिते शाक्ते पर्वणि अनुकलित चिन्मात्र गहनां
स्वसंवित्तिं योगी रसयति शिव आख्यां परतनुम् ॥१८॥

शब्दओघे	— शब्द स्पर्श इत्यादि समूह के	श्रिते	— आश्रय लेने पर
प्रलीने	— लय हो जाने पर,	योगी	— उत्तम योगी पुरुष
तत् अनु	— इसके पश्चात्	शिवाख्यां	— शिव ही नाम वाली
बिन्दुविभवे	— ज्ञानों के ऐश्वर्य के	परतनुं	— उत्कृष्ट स्वरूप
विरते	— हट जाने पर,	अनुकलित-	— भली प्रकार विमर्श से पहचानी हुई
ततः च	— इसके बाद	चिन्मात्रगहनां	— अति सूक्ष्म और चैतन्य रूप
अष्टध्वनिभिः	— आठ वर्गों की[1]	स्वसंवित्तिं	— अपनी संवित् [अहन्ता] का
अनुपाधिनि	— उपाधि रहित	रसयति	— चमत्कार लेता है। [चिदानन्दमय बन जाता है।]
तत्त्वे	— तत्त्व के		
उपरते	— शांत हो जाने पर		
शाक्तेपर्वणि	— शक्ति की अवस्था का		

परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निराकारज्ञान प्रकृतिमनवच्छिन्नकरुणाम्।

१. आठवर्ग— अ—अः, कवर्ग, चवर्ग, टवर्ग, तवर्ग, पवर्ग, य—व, श—ह

सवित्रीं भूतानां निरतिशयधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेवभजताम् ।१६।

पदच्छेदः

परानन्द आकारां निरवधि शिव ऐश्वर्य वपुषं
निराकार ज्ञान प्रकृति अनवच्छिन्न करुणाम् ।
सवित्रींभूतानां निरतिशयधाम आस्पद पदां
भवः वा मोक्षः वा भवतु भवतीम् एव भजताम् ।।१९।।

परानन्द-	— परमानन्द [आनन्द-शक्ति]		[सृष्टि शक्ति,इच्छा]
आकारां	— स्वरूप	निरतिशय-	— सब से उत्कृष्ट
निरवधि-	— असीम तथा अनन्त	धाम-	— अवस्था [परमशिव] का
शिवऐश्वर्य-	— शिव की ऐश्वर्यशक्ति [क्रिया शक्ति] के	आस्पदपदां	— आश्रय बनी हुई
		भवतीम् एव	— केवल आप ही का
वपुषं	— स्वरूप	भजतां	— विमर्श करने वालों को
निराकारज्ञान-	— अति सूक्ष्म ज्ञान शक्ति के	भवो वा	— चाहे संसार ही [हो]
प्रकृतिम्	— स्वभाव वाली,	मोक्षो वा	— या चाहे मुक्ति ही
अनवच्छिन्न-	— अपार	भवतु	— हो [उनके लिए संसार और निःसंसार भाव दोनों एक समान हैं]
करुणाम्	— अनुग्रह रूप,		
भूतानां	— सभी जड चेतन पदार्थों की		
सवित्रीं	— उत्पन्न करने वाली		

जगत्काये कृत्वा तमपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तमपि परनादाख्यगहने ।

तदेतज्ज्ञानाख्ये तदपि परमानन्दविभवे
महाव्योमाकारे ! त्वदनुभवशीलो विजयते ॥२०॥

पदच्छेदः

जगत् काये कृत्वा तं अपि हृदये तत् च पुरुषे
पुमांसं बिन्दुस्थं तं अपि पर नादआख्य गहने ।
तत् एतत् ज्ञान आख्ये तत् अपि परमानन्द विभवे
महाव्योम आकारे ! त्वत् अनुभव शील: बिजयते ॥२०॥

जगत्	— जगत् को		रूप (सदाशिव तत्त्व) में,
काये	— अपने शरीर में	तत् अपि	— उस सदाशिव अवस्था को भी
कृत्वा	— [विमर्श से लय] करके,	परमानंदविभवे	— परमानंद रूप ऐश्वर्य में (ऊपर से नीचे तक एक दूसरे में क्रमश: लय करते हुए
तं अपि	— उस शरीर को भी		
हृदये	— हृदय [संवित्] में,		
तत् च	— उस हृदय को भी		
पुरुषे	— पुरुष [जीवात्मा] में,		
तं	— उस		
बिन्दुस्थं	— बिन्दु [ज्ञान] में ठहरे हुए	महाव्योमाकारे !	हे चिदाकाश रूप देवी !
पुमांसं अपि	— पुरुष को भी	त्वत् अनुभवशील:	आपके अनुभव (विमर्श) स्वभाव वाला योगी
परनादाख्य-	— परनाद नाम वाले [ईश्वर तत्त्व]		
गहने	— घने स्वरूप में,	विजयते	— सबसे उत्कृष्ट (परमशिव) अवस्था को प्राप्त होता है ।
तत् एतत्	— उस पर नाद को भी		
ज्ञान आख्ये	— ज्ञान नाम वाले स्व-		

विधे विद्ये वेद्ये विविधसमये वेदजननि !
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके ।

शिवाज्ञे शीलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम्।२१।

पदच्छेदः

विधे विद्ये वेद्ये बिविधसमये वेदजननि !
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके ।
शिवाज्ञे शीलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातः मह्यं त्वयि वितरभक्तिं निरुपमाम् ॥२१॥

विधे !	— हे विधिरूप,
विद्ये !	— हे सभीविद्याओं के रूप
वेद्ये !	— [1]हे वेदों के रूप में व्यापिनी, [2]हे जानने योग्य,
विविधसमये !	—हे नाना सिद्धान्तों के रूप,
वेदजननि !	— हे वेदों की माता,
विचित्रे !	— हे नानाता रूपों वा-वाली [भेदमयी]
विश्व आद्ये !	— हे सभी जगत् के आद्य रूप,
विनयसुलभे !	— हे भक्ति से सुप्राप्य!
वेदगुलिके !	— हे वेदों की सार रूप,
शिव आज्ञे !	— हे शिव की आज्ञा [स्वतन्त्र इच्छा]
शीलस्थे !	— हे चित् स्वभाव में अटल स्थिति वाली,
शिवपदवदान्ये !	हे शिव के साथ ऐ-क्य दिलाने वाली,
शिवनिधे !	— हे शिव की साररूप हे कल्याण भरी अनु-ग्रहशक्ति
मातः !	— हे माता
मह्यं	— मुझे
शिवेत्वयि	— तुझ में ही [जो शिव से अभिन्न है
निरुपमाम्	— जिसकी कोई उप-मा नहीं ऐसी
भक्तिं	— भक्ति [प्रेम]
बितर	— दे ।

विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ।

अलंचक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः
शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥२२॥

पदच्छेदः

विधेः मुण्डं हृत्वा यत् अकुरुत पात्रं करतले
हरिं शूलप्रोतं यत् अगमयत् अंस आभरणताम् ।
अलं चक्रे कण्ठं यत् अपि गरलेन अम्ब ! गिरिशः
शिवस्थायाः शक्तेः तत् इदम् अखिलं ते विलसितम् ।२२।

अम्ब !	— हे माता,
गिरिशः	— शङ्कर ने
यत्	— जो
विधेः	— ब्रह्मा जी का
मुण्डं	— सिर
हृत्वा	— काट कर
करतले	— [उसे] हाथ में
पात्रं	— [भिक्षा] पात्र
अकुरुत	— बनाया,
यत्	— जो
हरिं	— विष्णु को
शूलप्रोतं	— त्रिशूल में पिरोकर
अंस-	— [अपने] कंधे के
आभरणतां	— भूषण भाव को
अगमयत्	— पहुँचाया (उसे कंधे पर उठाया)
यत् अपि	— और जो
कंठं	— अपने गले को
गरलेन	— हलाहल विष से
अलंचक्रे	— शोभायमान बनाया [विषको पी लिया]
तत् इदं अखिलं	— तो वह सब
ते	— तुझ
शिवस्थायाः	— शिव के साथ अभिन्न भाव से ठहरी हुई
शक्तेः	— शक्ति का ही
विलसितम्	— विकास है ।

विरिञ्च्याख्या मातः ! सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् ।

भवन्ती सादाख्या शिवयसि च पाशौघदलिनी
त्वमेवैकाऽनेका भवसि कृतभेदैर्गिरिसुते ! ॥२३॥

पदच्छेदः

विरिञ्चि आख्या मातः सृजसि हरिसंज्ञा त्वम् अवसि
त्रिलोकीं रुद्रआख्या हरसि विदधासि ईश्वर दशाम् ।
भवन्ती सादाख्या शिवयसि च पाशओघ दलिनी
त्वं एव एका अनेका भवसि कृतभेदैः गिरिसुते ! ॥२३॥

गिरिसुते !	— हे पार्वती !	विदधासि	— धारण करती हो,
मातः !	— हे माता,	सादाख्या	— सदाशिव नाम वाली
त्वं	— तुम	भवन्ती	— बनकर
विरिञ्चि-	— ब्रह्मा	पाशौघ-	— बन्धनों के समूहों को
आख्या	— नाम वाली [शक्ति के रूप से]	दलिनी	— काटने वाली [बन कर]
त्रिलोकीं	— तीनों लोकों की	शिवयसि	— आनन्दमय भी बनाती हो,
सृजसि	— सृष्टि करती हो,		
हरिसंज्ञा	— विष्णु नाम वाली [बनकर]	त्वं	— तुम
अवसि	— पालन [स्थिति] करती हो,	एका एव	— एक ही [अभेदमय] होकर भी
रुद्राख्या	— रुद्र नाम वाली [बन कर]	कृतभेदैः	— स्वतंत्रता से उत्पन्न किए हुए भेदों से
हरसि	— विश्व का संहार करती हो,	अनेका	— अनन्त [भेदमय] रूपों वाली
ईश्वरदशां	— ईश्वर दशा को भी	भवसि	— बनती हो ।

मुनीनां चेतोभिः प्रमृदितकषायैरपि मना-
गऽशक्ये संस्प्रष्टुं चकितचकितैरम्ब ! सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति! पदम् ॥२४॥

पदच्छेदः

मुनीनां चेतोभिः प्रमृदितकषायैः अपि मनाक्
अशक्ये संस्प्रष्टुं चकित चकितैः अम्ब ! सततम् ।
श्रुतीनां मूर्धानः प्रकृति कठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति ! पदम् ॥२४॥

अम्ब !	— हे माता,
प्रमृदित्-	— पूर्णतया हटाये हुए
कषायैः	— राग वाले [जिन मुनियों के चित्त से रागद्वेषादि दूर हो चुके हैं]
चकितचकितैः	— अत्यन्त भयभीत
मुनीनां	— मुनियों की
चेतोभिः	— बुद्धियों से
अपि	— भी
सतत	— नित्य
मनाक्	— अंशमात्र भी
संस्प्रष्टुं	— स्पर्श करने के लिए [जानने के लिए]
अशक्ये !	— अशक्य [मुनि भी तुम्हें जान नहीं सकते]
पार्वति !	— हे पार्वती,
श्रुतीनां	— वेदों के
मूर्धानः	— सिर बने हुए [उपनिषद्]
प्रकृतिकठिनाः	— जो स्वभाव से ही कठिन हैं
ते	— तुम्हारे
कोमलतरे	— अतिकोमल
पदकिसलये	— चरणकमलों में
कथं	— किस प्रकार
पदं	— स्थान
विन्दन्ते	— पा सकते हैं ।

तडिद्वल्लीं नित्याममृत सरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यामऽविनतकुचां विश्वजननी-
मपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ॥ २५ ॥

पदच्छेदः

तडित् वल्लीं नित्यां अमृत सरितं पाररहितां
मल उत्तीर्णां ज्योत्स्नां प्रकृतिं अगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यां अविनत कुचां विश्व जननीं
अपर्यन्तां लक्ष्मीं अभिदधति सन्तः भगवतीम् ॥२५॥

सन्तः	— भले पुरुष (परमार्थ के जानने वाले)	प्रकृतिं	— प्रकृति (जो गुणों सहित है),
भगवतीं	— देवी को	गिरां दूरां	-- वाणियों से परे (परन्तु)
तडित् वल्लीं	— विद्युत (बिजली) की लता	विद्यां	— सभी ज्ञानरूप [जो सभी वाणीमय हैं,]
नित्यां	— (परन्तु) अचल,		
पाररहितां	— जिसका कोई पार नहीं ऐसी	अविनत-	— न झुके हुए
		कुचां	— ज्ञान क्रियारूप स्तनों वाली (होते हुए भी)
अमृतसरितं	— चिदमृत की नदी,		
ज्योत्स्नां	— चांदनी (परन्तु)		
मलउत्तीर्णां	— मलों रहित	विश्वजननीं	— जगत् की माता
अगुणग्रंथि	— गुणों की ग्रंथियों रहित	अपर्यन्तां	— सीमा रहित
		लक्ष्मीं	— लक्ष्मी इन इन अनेक नामों से
गहनाम्	— अगम (अति सूक्ष्म तथा रहस्य) माया जो त्रिगुणमयी है	अभिदधति	— पुकारते हैं ।

शरीरं क्षित्यम्भः प्रभृतिरचितं केवलमिदं
सुखं दुःखं चायं कलयति पुमांश्चेतन इति।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहंकारं तव समयबाह्यो गिरिसुते ! ॥२६॥

पदच्छेदः

शरीरं क्षिति अम्भः प्रभृतिरचितं केवलं इदम्
सुखं दुःखं च अयं कलयति पुमान् चेतनः इति ।
स्फुटं जानानः अपि प्रभवति न देही रहयितुं
शरीर अहङ्कारं तव समयबाह्यः गिरिसुते ! ॥२६॥

गिरिसुते !	— हे पार्वती,	इति	— ही
अयं	— यह	कलयति	— जानता है,
चेतनः	— चेतन	तव	— तुम्हारे
पुमान्	— पुरुष	समयबाह्यः	— सिद्धान्त को न जानने वाला
इदं	— इस		
केवलं	— केवल	स्फुटं	— भली प्रकार
क्षिति-	— पृथिवी,	जानानः अपि	— जानता हुआ भी
अम्भः-	— जल,	देही	— शरीर धारी (देहाभिमानी)
प्रभृति	— आदि पंच महाभूत का	शरीर अहंकारं	— देहाभिमान को
रचितं	— बना हुआ,	रहयितुं	— छोडने में
शरीरं	— शरीर को	न प्रभवति	— समर्थ नहीं बनता है।
सुखं दुःखं च	— और सुख दुःख को		

पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति।

तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी ।२७।

पदच्छेदः

पिता माता भ्राता सुहृत् अनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनं अपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भय मोह अन्ध तमसं
महाज्योत्स्ने मातः ! भव करुणया सन्निधिकरी ।।२७।।

महाज्योत्स्ने!	— हे महाप्रकाशमयी
मातः	— जगत् को उत्पन्न तथा पालन करने वाली मां,
पिता	— पिता,
माता	— मां,
भ्राता	— भाई,
सुहृद्	— अत्यन्त प्रेमी,
अनुचरः	— नौकर,
सद्म	— घर,
गृहिणी	— पत्नी,
वपुः	— शरीर,
पुत्रः	— पुत्र,
मित्रं	— मित्र,
धनं अपि	*— और धन भी*
यदा	*— जिस समय (मरण* काल पर)
मां	— मुझे
विजहति	— छोड दें,
तदा	— तो उस समय
करुणया	— दया करके
मे	— मेरे
भयमोहान्ध-	— भय और मोहरूप
तमसं	— अन्धकार को
भिन्दाना	— नाश करती हुई
सपदि	— तुरन्त ही
सन्निधिकरी	— प्रत्यक्षरूप से प्रकट
भव	— हो जाइये । मुझे अपने साथ एकता करा दी-*जिये ।*

सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य तनया ।

अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती
विवाहाज्जायासीत्यहह चरितं वेत्ति तव कः ॥२८॥

पदच्छेदः

सुता दक्षस्य आदौ किल सकलमातः ! त्वं उदभूः
सदोषं तं हित्वा तत् अनु गिरिराजस्य तनया ।
अनाद्यन्ता शम्भोः अपृथक् अपि शक्तिः भगवती
विवाहात् जाया असि इति अहह चरितं वेत्ति तव कः ।२८।

सकल मातः !	— हे सब की मां,	भगवती	— ऐश्वर्यवती
त्वम्	— तुम	अपृथक् अपि शक्तिः	[शिव से] अभिन्न [उसकी]शक्ति होते हुए भी
आदौ	— पहिले		
किल	— निश्चय ही		
दक्षस्य	— दक्ष प्रजापति की	विवाहात्	— विवाह करके
सुता	— पुत्री [के रूप में]	शम्भोः	— शिव की
उदभूः	— उत्पन्न हुई,	जाया	— पत्नी
तत्अनु	— इसके बाद	असि	— बनी,
तं	— उस [दक्ष को]	अहह	— आश्चर्य है,
सदोषं	— दोष सहित को	तव	— तुम्हारे
हित्वा	— छोडकर	चरितं	— कर्तव्यों को
गिरिराजस्य	— हिमालय की	कः	— कौन
तनया	— बेटी [बनी],	वेत्ति ?	— जान सकता है । [कोई भी नहीं जान सकता]
अनाद्यन्ता	— आदि और अन्त रहित		

कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ।

शिवादिक्षित्यन्तं त्रिवलयतनोः सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ।२६।

पदच्छेदः

कणाः त्वत् दीप्तीनां रविशशि कृशानु प्रभृतयः
परं ब्रह्म क्षुद्रं तव नियतं आनन्द कणिका ।
शिवआदि क्षिति अन्तं त्रिवलयतनोः सर्वं उदरे
तव आस्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ! ॥२९॥

रवि-	— सूर्य,	शिवादि-	— शिव से
शशि-	— चन्द्रमा,	क्षित्यन्तं	— पृथिवी तक
कृशानु-	— अग्नि,	सर्वं	— सारा विश्व
प्रभृतयः	— इत्यादि [सभी तेज वाले]	त्रिवलयतनोः	— तीन लपेट वाले [प्रमाता, प्रमाण, प्रमेय स्वरूप]
त्वत्-	— तुम्हारी		
दीप्तीनां	— अनन्त दीप्तियों के [तेजों के]	तव	— तुम्हारे
		उदरे	— स्वरूप में
कणाः	— अत्यंत छोटे अंश हैं,	आस्ते	— ठहरा हुआ है ।
क्षुद्रं	— अति तुच्छ [तुम्हारे अपार स्वरूप के मुकाबले में]	भगवति !	— हे भगवती,
		भक्तस्य	— भक्त के
		हृदि	— हृदय में
परं ब्रह्म	— परं ब्रह्म भी	स्फुरसि	— तुम विकसित होती हो,
…यतं	— निश्चय ही		
	— तुम्हारे	चित्रम्[1]	— यह आश्चर्य की बात है ।
…कणिका	— आनन्द का एक कण है,		

…हृदय की इतनी विशालता है कि देवी का अपार स्वरूप जिसके …
… चन्द्रमा, आदि तुच्छ हैं, उस हृदय में समा जाता है

त्वया यो जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब ! त्वमसि निखिला यस्य तनवः ।
गतः साम्यं शम्भुर्वहति परमं व्योम भवती
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ।३०।

पदच्छेदः

त्वया यो जानीते रचयति भवत्या एव सततं
त्वया एव इच्छति अम्ब ! त्वं असि निखिलाः यस्य तनवः ।
गतः साम्यं शम्भुः वहति परमं व्योम भवती
तथा अपि एवं हित्वा विहरति शिवस्य इति किं इदम् ।३०।

अम्ब !	— हे माता !	असि	— हो,
यः	— जो [शिव]	शम्भुः	— शिव
त्वया	— तुम्हारे ही स्वरूप से [ज्ञान शक्ति से]	साम्यं गतः	— समभाव को पहुँच कर
जानीते	— जानता है [ज्ञान शक्ति]	परमं व्योम	— उत्कृष्ट चिदाकाश को
भवत्या एव	— तुम्हारे ही स्वरूप से	वहति	— धारण करता है,
रचयति	— सृष्टि करता है[क्रियाशक्ति]	एवं	— इस प्रकार के स्थूल सूक्ष्म स्वभाव को
सततं	— नित्य	हित्वा	— छोड कर
त्वया एव	— तुम्हारे ही स्वरूप से	भवती	— आप
इच्छति	— इच्छा करता है, [इच्छा शक्ति]	शिवस्य	— शिव के[चिदाक स्वभाव से
यस्य	— जिसके	विहरति	— क्रीडा कर
निखिलाः	— सभी	इति	
तनवः	— स्वरूप	किं इदम्	— यह कै की
त्वम्	— तुम ही		

पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूलं सूक्ष्मं सकुलमकुलं गुह्यमगुहम् ।
दवीयो नेदीयः सदसदिति विश्वं भगवतीं
सदा पश्यन्त्याज्ञां वहसि भुवनक्षोभ जननीम् ।३१।।

पदच्छेदः

पुरः पश्चात् अन्तर् बहिः अपरिमेयं परिमितम्
परं स्थूलं सूक्ष्मं सकुलं अकुलं गुह्यं अगुहम् ।
दवीयः नेदीयः सत् असत् इति विश्वं भगवतीम्
सदा पश्यन्ति आज्ञां वहसि भुवन क्षोभजननीम् ।।३१।।

पुरः	— प्रत्यक्ष [जाना हुआ]	नेदीयः	— अति प्रकट [अपने साथ ही रहने वाला]
पश्चात्	— परोक्ष, [न जाना हुआ]		
अन्तर्	— अन्तःकरणों का विषय,	सत्-	— सत्ता रूप
		असत्	— अभाव [शून्य] रूप
बहिः	— बहिष्करणों का विषय,	इति	— इन इन भिन्न भिन्न रूपों से
अपरिमेयं	— अनन्त,	विश्वं	— सारे जगत् को
परिमितं	— छोटा, [संकुचित्]	भगवतीं	— आपका ही स्वरूप
परं	— उत्कृष्ट,	सदा	— नित्य
स्थूलं	— स्थूल,	पश्यन्ति	— [भक्तजन] देखते हैं
सूक्ष्मं	— सूक्ष्म,	भुवन-	— सारे विश्व को
सकुलं	— विश्वमय,	क्षोभजननीं	— क्षोभ उत्पन्न कराने वाले [भेदमय बनाने वाले]
अकुलं	— विश्वोत्तीर्ण,		
गुह्यं	— छिपाने योग्य,		
अगुहं	— प्रकट	आज्ञां	— स्वभाव को

दवीयो	— बहुत ही दूर [अपने से भिन्न]	वहसि	— धारण करती हो।

मयूरवाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलप्रतिहतमहिम्नीव पृषतः।
उदेत्योदेत्याम्ब त्वयि सह निजैस्तात्त्विककुलै-
र्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥३२॥

पदच्छेदः

मयूरवाः पूष्णि इव ज्वलने इव तत् दीप्तिकणिकाः
पयोधौ कल्लोल प्रतिहतमहिम्नि इव पृषतः।
उदेत्य उदेत्य अम्ब ! त्वयि सह निजैः तात्त्विककुलैः
भजन्ते तत्त्व ओघाः प्रशमम् अनुकल्पं परवशाः ॥३२॥

अम्ब !	— हे माता,	तत्त्वओघाः	— तत्त्वों के समूह
मयूरवाः	— किरणें	उदेत्य उदेत्य	— बार बार उदय करके
पूष्णि	— सूर्य में		
इव	— जैसे,	निजैः	— अपनें अपने
ज्वलनेइव	— अग्नि में जैसे	तात्त्विक-	— तेजोमय
तद्दीप्तिकणिका	उसी अग्नि के कण	कुलैः सह	— समूहों के साथ
पयोधौ	— सागर में	परवशाः	— बेबस होकर
कल्लोल-	— तरंगों द्वारा	त्वयि	— तुम्हारे ही स्वरूप में
प्रतिहत-	— छिपाये हुए	अनुकल्पं	— दृढ़ प्रकार से
महिम्न	— महिमा वाले [सागर में]	प्रशमं	— शान्ति को
		भजन्ते	— प्राप्त करते हैं [तुम में ही लय हो जाते हैं।
पृषतः इव	— छींटें जैसे [निकल कर उसी में लय हो जाते हैं वैसे ही]		

विधुर्विष्णुर्ब्रह्माप्रकृतिरणुरात्मादिनकरः
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ।
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां
विकल्पैरेभिस्त्वामऽभिदधति सन्तो भगवतीम् ।३३।

पदच्छेदः

विधुः विष्णुः ब्रह्मा प्रकृतिः अणुः आत्मा दिनकरः
स्वभावः जैनेन्द्रः सुगतमुनिः आकाशं अनिलः ।
शिवः शक्तिः च इति श्रुतिविषयतां तां उपगतां
विकल्पैः एभिः त्वां अभिदधति सन्तः भगवतीम् ॥३३॥

विधुः	— चन्द्रमा, [आनन्द शक्ति]	अनिलः	— वायु,
विष्णुः	— विष्णु, [व्यापक]	शिवः	— शिव,
ब्रह्मा	— ब्रह्मा,	शक्तिश्चइति	— और शक्ति
प्रकृतिः	— प्रकृतितत्त्व,	एभिः	— इन इन [भिन्न भिन्न]
अणुः	— जीव,	विकल्पैः	— विकल्पों [नामों] से
आत्मा	— चित् शक्ति,	त्वां	— तुझ
दिनकरः	— सूर्य,	भगवतीं	— भगवती को
स्वभावः	— स्वभाव,	तां	— उस
जैनेन्द्रः	— महावीर स्वामी,	श्रुतिविषयतां	— सुनने का विषय
सुगतमुनिः	— बुद्धभगवान,	उपगतां	— बनी हुई को
आकाशं	— आकाश,	सन्तः	— श्रेष्ट पुरुष
		अभिदधति	— पुकारते हैं।

प्रविश्य स्वं मार्गं सहजदयया देशिकदृशा
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ।

परानन्दाकारां सपदि शिवयन्तीमपि तनुं
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ।३४।

पदच्छेदः

प्रविश्य स्वं मार्गं सहजदयया दैशिकदृशा
षट् अध्वध्वान्त ओघच्छिदुरगणनातीतकरुणाम् ।
परानन्द आकारां सपदि शिवयन्तीम् अपि तनुं
स्वम् आत्मानं धन्याः चिरम् उपलभन्ते भगवतीम् ।।३४।।

धन्याः	— भाग्यवान पुरुष
सहजदयया	— आपकी स्वाभाविक दया से
दैशिकदृशा	— [तथा] उत्तम गुरु-जनों के अनुग्रह से
स्वंमार्गं	— अपने [सुषुम्ना] मार्ग में
प्रविश्य	— प्रवेश करके
षट्अध्व-	— छः मार्ग रूप
ध्वान्तौघ-	— अन्धकार [अज्ञान] के समूह के
च्छिदुर-	— काटने के लिए
गणनातीत-	— पर्यन्त रहित
करुणाम्	— दया रूप [देवी को]
परानन्दाकारां	– परमानन्द रूप
तनुं अपि	— शरीर को भी
शिवयन्तीम्	— कल्याणमय बनाती हुई
भगवतीं	— भगवती को
स्वं आत्मानं	— अपना ही स्वरूप
सपदि	— झटपट [निरायास]
चिरं	— अनन्तकाल तक
उपलभन्ते	— जानते हैं ।

शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ।।३५।।

पदच्छेद:

शिव: त्वं शक्ति: त्वं त्वं असि समया त्वं समयिनी
त्वं आत्मा त्वं दीक्षा त्वं अयं अणिमा आदि: गुणगण: ।
अविद्या त्वं विद्या त्वं असि निखिलं त्वं किं अपरम्
पृथक् तत्त्वं त्वत्तो भगवति ! न वीक्षामहे इमे ॥३५॥

भगवति !	— हे भगवती,
त्वम्	— तुम ही
शिव:	— शिवरूप हो,
त्वं	— तुम ही
शक्ति:	— शक्तिरूप हो,
त्वं	— तुम ही
समया असि	— सिद्धान्त रूप हो,
त्वं	— तुम ही
समयिनी	— सिद्धान्त कर्त्री हो,
त्वम्	— तुम ही
आत्मा	— आत्मा हो,
त्वम्	— तुम ही
दीक्षा	— उपदेशरूप भी हो
त्वम्	— तुम ही
अयं	— यह
अणिमादि:	— अणिमादि सिद्धियां हो
गुणगण:	— (तुम ही) गुणों का समूह हो, (सत्त्व, रज तम)
त्वं	— तुम ही
अविद्या	— अज्ञानरूप भी हो,
त्वम्	— तुम ही
विद्या	— ज्ञानरूप हो,
निखलं	— सभी कुछ
त्वं असि	— तुम ही हो,
किं अपरं	— कौनसा दूसरा
तत्त्वं	— ऐसा तत्त्व
त्वत्तो	— तुम से
पृथक्	— भिन्न है
इमे (वयं)	— ऐसे हम
न वीक्षामहे	— इस बात को नहीं जानते हैं।

असंख्यैः प्राचीनैर्जननि, जननैःकर्मविलया-
द्रुते जन्मन्यन्तं, गुरुवपुषमासाद्य गिरिशम्।
अवाप्याज्ञां, शैवीं, क्रमतनुरपि त्वां विदितवा-
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ॥३६॥

पदच्छेदः

असंख्यैः प्राचीनैः जननि ! जननैः कर्म विलयात्
गते जन्मनि अन्तं गुरुवपुषं आसाद्य गिरिशम् ।
अवाप्य आज्ञां शैवीं क्रमतनुः अपि त्वां विदितवान्
नयेयं त्वत्पूजास्तुति विरचनेन एव दिवसान् ॥३६॥

जननि !	— हे माता,
प्राचीनैः	— पिछले
असंख्यैः	— जो गिने नहीं जा सकते इतने
जननैः	— जन्मों द्वारा
कर्मविलयात्	— कर्मों के नष्ट होने से
जन्मनि	— जन्मों के
अन्तंगते	— अन्त होने पर (जीवन्मुक्त दशा प्राप्त करके भी)
गुरुवपुषम्	— गुरुवर के स्वरूप
गिरिशम्	— शिव को
आसाद्य	— प्राप्त करके (साक्षात्कार करके)
शैवीं	— शिवरूप
आज्ञां	— सिद्धान्त को (अद्वैत चैतन्य मार्ग)
अवाप्य	— पाकर [उसका] मनन तथा निधिध्यासन करके]
क्रमतनुः अपि	— सक्रम [मनुष्य] शरीर धारण करता हुआ भी
त्वां	— तुझ को
विदितवान्	— जानता रहूं (और)
त्वत्-	— तुम्हारी
पूजास्तुति-	— पूजा तथा स्तुति इत्यादि के
विरचनेन एव	— बनाने और करने में ही
दिवसान्	— इस जन्म के शेष दिन
नयेयम्	— व्यतीत करूं । (यही मेरी प्रार्थना है)

यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या
योनिस्तस्याः प्रथितमुदरे यत्तदोङ्कारपीठम् ।

तस्मिन्नऽन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां
श्यामाकारां सकलजननीं सन्ततं भावयामि ।३७।

पदच्छेदः

यत् षट्पत्रं कमलं उदितं तस्य या कर्णिका आख्या
योनिः तस्याः प्रथित उदरे यत् तत् ओंकार पीठम् ।
तस्मिन् अन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां
श्याम आकारां सकलजननीं सन्ततं भावयामि ॥३७॥

यत्	— जो
षट्पत्र	— छः पत्तों वाला
कमल	— कमल
उदित	— खिला हुआ
तस्य	— उस कमल की
या	— जो
कर्णिकाख्या	— कर्णिका नाम वाली
योनिः	— योनि [मध्य] है
तस्याः	— उस [योनि] के
उदरे	— बीच में
यत् तत्	— जो वह [अलौकिक]
ओंकारपीठं	— ओंकार रूप पीठ
प्रथितं	— प्रकट है
तस्मिन् अन्तः	— उस ओंकार पीठ के अन्दर
कुचभरनतां	— [ज्ञान क्रिया रूप] स्तनों के बोझ से झुकी हुई
कुण्डलीतः	— कुण्डलिनी रूप से
प्रवृत्तां	— प्रवृत्त हुई
श्यामाकारां	— श्याम वर्ण
सकलजननीं	— सबको उत्पन्न तथा पालन करने वाली देवी को
सन्ततं	— बारम्बार
भावयामि	— मैं भावना करता हूं।

भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ।

वहति कुचभराभ्यां या विनम्रापि विश्वं
सकलजननि सा त्वं पाहिमामित्यवश्यम् ॥३८॥

पदच्छेदः

भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमाने अपि अष्टधा शक्तिः एका ।
वहति कुचभराभ्यां या विनम्रा अपि विश्वं
सकलजननि ! सा त्वं पाहि मां इति अवश्यम् ॥३८॥

सकलजननि ! — हे जगत को उत्पन्न करने वाली मां,
या — जो [तुम]
एका अपि — एक रूप होते हुए भी
भुवि — पृथिवी में,
पयसि — जल में,
कृशानौ — अग्नि में,
मारुते — वायु में,
खे — आकाश में,
शशाङ्के — चन्द्रमा [प्रमेय] में,
सवितरि — सूर्य [प्रमाण] में,
यजमाने — यज्ञ करने वाले [प्रमाता] में
अष्टधा — आठ प्रकार की
शक्तिः — शक्ति
कुचभराभ्यां — स्तनों के बोझ से
विनम्रा अपि — झुकी हुई भी
विश्वं — जगत् को
वहति — धारण करती है
सा त्वं — वही तुम
मां — मेरी
पाहि — रक्षा करो
इति अवश्यम् — यह अवश्य बात है।

इति श्री पञ्चस्तव्यां सकलजननीस्तवः पञ्चमः ॥

समाप्ता चेयं पञ्चस्तवी ॥

इति शिवम्

Printed at :-

The Fine Art Press 2nd Bridge,

Srinagar-Kashmir

میں دنیا کی شہرہ گرنتھوں کا ریڈ پرانت کرنا ہی پسند کرتا ہوں کیونکہ

میرا یہ ماننا ہے گرنتھوں کا رستہ ہی نہیں دنیا والی ... دیوتا

دیکھنے کا یہ ہی بہترین طریقہ ہے۔ میں دس منتر الوک کے ارتھ کو

کرتا ہے۔ جن میں شانتی ہے اس ترجمہ کرنا چاہتا ہوں کیونکہ

اس کو کرتا ہے اس کا اصل ارتھ سمجھ کر ... ترجمہ

کرنا چاہتا ہوں۔ جس اصل ارتھ کی دوسرے گرنتھ کاروں نے ورنن

کیا ہے یا جنہوں نے اس کے اصلی ارتھ کو نہ سمجھا ہے۔